एवं परम्पराप्राप्तं तथा राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ! ॥”
इति श्रीभगवद्गीतायां ४ अध्यायः ॥

परम्पराकं, क्ली, (परम्परया कायते प्रकाशते इति । कै + कः । परम्पराख्यापितपशुहननात् तथात्वम् ।) यज्ञार्थपशुहननम् । तत्पर्य्यायः । शमनम् २ प्रोक्षणम् ३ । इत्यमरः । २।७।२६ ॥ घातनम् ४ वधः ५ । इति शब्दरत्नावली ॥

परम्परीणं, त्रि, (परांश्च परतरांश्च अनुभवति । “परोवरपरम्परेति ।” ५ । २ । १० । इति खः । प्रकृतेः परम्परभावो निपात्यते ।) परम्पराप्राप्तम् । यथा, भट्टिः । ५ । १५ ।
“लक्ष्मीं परम्परीणां त्वं पुत्त्रपौत्त्रीणतां नय ॥”

पररुः, पुं, (पिपर्त्ति देहादिकं पूरयतीति । पॄ + बाहुलकात् अरुः ।) केशराजः । इति त्रिकाण्डशेषः ॥

परलोकः, पुं, (परो लोकः ।) लोकान्तरम् । तच्च स्वर्गादि । यथा,—
“समस्तशास्त्राभ्यूयिष्ठपाप्यैर्मत्वमेत्य यम् ।
लोके प्रयाति पन्थानं परलोकेन तं कुतः ॥”
इति नैषधम् ॥

परलोकगमः, पुं, (परलोके लोकान्तरे गमो गमनं यस्मात् ।) मृत्युः । इति हेमचन्द्रः ॥

परवशः, त्रि, (परस्य परेषां वा वशः वशीभूतः ।) अन्यवशीभूतः । तत्पर्य्यायः । परायत्तः २ पराधीनः ३ परच्छन्दः ४ परवान् ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १५६ ।
“यद्यत् परवशं कर्म्म तत्तद् यत्नेन वर्ज्जयेत् ।
यद्यदात्मवशन्तु स्यात्तत्तत् सेवेत यत्नतः ॥”)

परवाणिः, पुं, (परं धर्म्मं वाणयति प्रकाशयति । वण शब्दे + णिच् + इन् । धातूनामनेकार्थत्वादत्र प्रकाशार्थः ।) धर्म्माध्यक्षः । वत्सरः । इति मेदिनी ॥ (परं शत्रुं सर्पमित्यर्थः वाणयतीति ।) कार्त्तिकेयवाहनो मयूरः । इति शब्दमाला ॥

परवान्, [त्] त्रि, (परः स्वामी अस्त्यस्य । “तदस्यास्त्यस्मिन्निति ।” ५ । २ । ९४ । इति मतुप् मस्य वः ।) पराधीनः । इत्यमरः ।३।१।१६ (यथा, रघौ । २ । ५६ ।
“भवानपीदं परवानवैति
महान् हि यत्नस्तव देवदारौ ॥”)

परव्रतः, पुं, (परं व्रतमस्य ।) धृतराष्ट्रः । इति शब्दरत्नावली ॥

परशः, क्ली, (स्पृशतीति । पृषोदरादित्वात् साधुः । अस्य स्पर्शनात् अपरस्य धातोः स्वर्णत्वं जायते अतोऽस्य तथात्वम् ।) रत्नविशेषः । यथा, —
“मुक्तामाणिक्यपरशमणिरत्नाकरान्वितम् ।
कृष्णामुक्तहरिद्रक्तमणिराजिविराजितम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

परशव्यं, त्रि, परशवे हितम् । तस्मै हितादावुदन्तगवादेर्यत् । इति संक्षिप्तसारसूत्रम् ॥ (गां उपगवादिभ्यो यत् । परशुहितम् । इति व्याकरणम् ॥)

परशुः, पुं, (परान् शत्रून् शृणाति छिनत्त्यनेनेति । शॄ हिंसायाम् + “आङ्परयोः खनिशॄभ्यां डिच्च ।” उणां । १ । ३४ । इति कुः स च डित् ।) अस्त्रविशेषः । टाङ्गी इति भाषा ॥ तत्पर्य्यायः । पर्शुः २ परश्वधः ३ पर्श्वधः ४ स्वधितिः ५ कुठारः ६ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८६।१४ ।
“ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवीबाणौघैरपातयत भूतले ॥”)

परशुधरः, पुं, (धरतीति धरः । धृ + अच् । ततः परशोर्धरः ।) गणेशः । इति हलायुधः ॥ (परशुरामः । परशुशस्त्रप्रधानत्वादस्य तथात्वम् ॥)

परशुरामः, पुं, (परशुना कुठाराख्यशस्त्रेण रामः रमणं यस्य । परशुशस्त्रबलेनैव दुष्टक्षत्त्रियवंशान् निहत्यात्मानं रमयति इति तात् पर्य्यार्थः ।) भगवतः षोडशावतारः । यथा,—
“अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्त्रामकरोन्महीम् ॥”
इति श्रीभागवते १ स्कन्धे २ अध्यायः ॥
तत्पर्य्यायः । जामदग्न्यः २ परशुरामः ३ परशुरामकः ४ भार्गवः ५ भृगुपतिः ६ भृगुलापतिः ७ । इति शब्दरत्नावली ॥ अस्योत्पत्त्यादिकं यथा,—
मार्कण्डेय उवाच ।
“अथ काले व्यतीते तु जमदग्निर्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्त्रान् चतुरो वेदसम्मतान् ॥
रुमण्वन्तं सुषेणञ्च विश्वं विश्वावसुन्तथा ।
पञ्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधायाशु शक्राद्यैः सकलैः सुरैः ।
याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदाच न ॥
अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात् ।
ब्राह्मणः क्षत्त्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ।
स वेदानखिलान् ज्ञात्वा धनुर्वेदांश्च सर्व्वशः ।
स्वतातात् कृतकृत्योऽभूद्वेदविद्याविशारदः ॥”
इति कालिकापुराणे ८५ अध्यायः ॥
अवशिष्टं पाद्मोत्तरखण्डे ५० अध्याये द्रष्टव्यम् ॥ (अयमेव पितुरादेशात् परशुना स्वमातुः शिरश्चिच्छेद ततः प्रसन्नात् पितुर्वरं लब्ध्वा मातरं पुनर्जीवयामास । यदुक्तं महाभारते । ३ । ११६ । ५—१८ ।
“फलाहारेषु सर्व्वेषु गतेष्वथ सुतेषु वै ।
रेणुका स्नातुमगमत् कदाचिन्नियतव्रता ॥
सा तु चित्ररथं नाम मार्त्तिकावतकं नृपम् ।
ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ॥
क्रीडन्तं सलिले दृष्ट्वा सभार्य्यं पद्ममालिनम् ।
ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ॥
व्यभिचाराच्च सा तस्मात् क्लिन्नाम्भसि विचेतना ।
प्रविवेशाश्रमं त्रस्ता तां वै भर्त्ता त्वबुध्यत ॥
स (जमदग्निः) तां दृष्ट्वा च्युतां धैर्य्यात् ब्राह्म्या लक्ष्म्या विवर्ज्जिताम् ।
धिक्शब्देन महातेजा गर्हयामास वीर्य्यवान् ॥
ततो ज्येष्ठो जामदग्न्यो रुमण्वान्नाम नामतः ।
आजगाम सुषेणश्च वसुर्व्विश्वावसुस्तथा ॥
तानानुपूर्व्व्याद्भगवान् वधे मातुरचोदयत् ।
न च ते जातसम्मोहाः किञ्चिदूचुर्व्विचेतसः ॥
ततः शशाप तान् क्रोधात्ते शप्ताश्चेतनां जहुः ।
मृगपक्षिसधर्म्माणः क्षिप्रमासन् जडोपमाः ॥
ततो रामोऽभ्ययात् पश्चादाश्रमं परवीरहा ।
तमुवाच महाबाहुं जमदग्निर्महातपाः ॥
जहीमां मातरं पापां मा च पुत्त्र ! व्यथां कृथाः ।
तत आदाय परशुं रामो मातुः शिरोऽहरत् ॥
ततस्तस्य महाराज ! जमदग्नेर्महात्मनः ।
कोपोऽभ्यगच्छत् सहसा प्रसन्नश्चाब्रवीदिदम् ॥
ममेदं वचनात्तात ! कृतं ते कर्म्म दुष्करम् ।
वृणीष्व कामान् धर्म्मज्ञ ! यावतो वाञ्छसे हृदा ॥
स वव्रे मातुरुत्थानमस्मृतिञ्च वधस्य वै ।
पापेन तेन चास्पर्शं भ्रातॄणां प्रकृतिन्तथा ॥
अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत ! ।
ददौ च सर्व्वान् कामांस्तान् जमदग्निर्महातपाः ॥”
अयं पुनर्बलदर्पितं आश्रमात् वत्सच्छारिणं कार्त्तवीर्य्यार्ज्जुनं हतवान् । अनेन जातामर्षास्तस्यार्ज्जुनस्य सुतास्ततःप्रभृति कालं प्रतीक्षमाणाः कदाचित् रामविरहितमाश्रममागत्य तस्य पितरं जमदग्निं निजघ्नुः । रामस्तु अस्मात् पितृवधामर्षात् त्रिःसप्तकृत्वः पृथिवीं निःक्षत्त्रियामकरोत् । ततो गच्छति काले दाशरथिना रामेण हतगर्व्वो दक्षिणाशां गत्वा महेन्द्रे गिरौ उग्रेण तपसा कालं यापयति ॥)

परश्वः, [स्] व्य, श्वः परदिनम् । आगामिदिनात् परदिनम् । इत्यमरः । ३ । ४ । २२ ॥ अस्य टीका परश्वःशब्दे द्रष्टव्या । गतदिनात् पूर्व्वदिनम् । पर्शु इति भाषा ॥ यथा,—
“परश्वश्च महाभाग ! स्नातुं गङ्गाह्रदं गता ।
अवतीर्णा विकृष्टास्मि दृढनागेन केनचित् ॥”
इति मार्कण्डेयपुराणे अवीक्षिच्चरितम् ॥

परश्वधः, पुं, (पर + श्वि + अन्येभ्योऽपीति डः । ततः परश्वं दधातीति । “आतोऽनुपेति” ३ । २।३ इति कः ।) कुठारः । इत्यमरः । २ । ८ । ९२ ॥ (यथा, रघौ । ६।४२ ।
धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्त्रसाराम् ॥”)

परसंज्ञकः, पुं, (परा श्रेष्ठा संज्ञा अस्य । ततः कप् ।) आत्मा । इति शब्दरत्नावली ॥

परस्परं, त्रि, (“सर्व्वनाम्नो द्वे वाच्ये समासवच्च बहुलम् ।” वार्त्ति असमासवद्भावे पूर्व्वपदस्य सुपः सुर्व्वक्तव्यः । कस्कादित्वात् विसर्ज्जनीयस्य सः ।) अन्योन्यम् । इतरेतरम् । यथा,—
“वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः ।